श्रीगणेशायनमः॥श्रीलक्ष्मीनृसिंहायनमः॥ अनुमितिं प्रतिसाध्याव्याप्यत्वावच्छिन्नहेतुप्रका
१ रतानिरूपितपक्षविशेष्यतानिरूपितलिङ्गज्ञानत्वरूपविशिष्टपरामर्शत्वेननहेतुत्ता॥ किंतुव्याप्य
तावच्छेदकप्रकारकव्याप्तिज्ञानत्वेननव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेनचहे
तुताद्वयं॥एवंचधूमोवह्निव्याप्यःधूमवान्पर्वतइत्याकारज्ञानद्वयातथाविधसमूहालंबन
रूपादप्यनुमितिरुत्पद्यते॥नकेवलंविशिष्टपरामर्शादेव॥अत्रचधूमोवह्निव्याप्यअ
लोकवान्पर्वतइत्याद्याकारकज्ञानद्वयादनुमित्यापत्तिः॥ धूमत्वालोकत्वायोरुन्नयोरेव

व्याप्यत्वावच्छेदकत्वादिति तुनान्नांकनीयं॥तोविशि धूमलिंगकानुमितिंप्रतिधूमत्वाव्यवच्छिन्नविशेष्यक
प्रकारकज्ञानत्वेनचहेतुनेतिआतोनोयदर्शितापत्तिन तद्धर्मावच्छिन्नविशेष्यकव्याप्तिज्ञानतद्धर्मावच्छि
न्नप्रकारकपक्षधर्मताज्ञानयोर्दंडचक्रादिवन्नितयोरवकार्योपधायकत्वात्॥उपदर्शितविशिष्टपरामर्शत्वा
वच्छेदेनैकहेतुताकल्पनमेवतादृशकारणताद्वयकल्पनापेक्षयालघीयइत्यपिन॥तादृशहेतुकारणता
द्वयकल्पनेपिबाढुरुत्यविरहात्॥तथाहि॥कारणत्वंनाखंडोधर्मः॥किंतुअनन्यथासिद्धत्वेसतिनिय
तपूर्ववृत्तित्वं॥तत्रव्याप्यनावच्छेदकप्रकार।कव्याप्तिज्ञानत्वेनतथाविधपक्षधर्मताज्ञानत्वनचनि
यतपूर्ववर्तित्वमुभयवादिसिद्धमेव॥तादृशधर्मयोर्विशिष्टपरामर्शत्वव्यापकत्वात्॥तदवच्छेदेननिय

तपूर्ववृत्तित्वे सिध्देतादृशधर्मद्वयावच्छेदेनतथात्वस्यावश्यकत्वात्॥ किंतुतादृशधर्मद्वयावच्छेदेनान्यथासिध्दत्वमा
२ त्रमस्माकं॥ विशिष्टपरामर्शीहेतुतामतेचविशिष्टपरामर्शत्वावच्छेदेनानन्यथासिध्दत्वंनियतपूर्ववर्तित्वंचकल्य
नीयं॥एवंचास्माकंलघुधर्मद्वयावच्छेदेनैकधर्मकल्पनंभवतांमतेगुरुधर्मावच्छेदनधर्मद्वयकल्पनमितिवि
परीतमेवगौरवमितिमीमांसकाः॥अत्रोच्यते॥ धूम त्वावच्छिन्नविशेष्यकव्याप्तिज्ञानत्वादिरूपधर्मावच्छेदनव
ह्न्याद्यनुमितिसामान्यनियतपूर्ववर्तित्वंबाधितमेवतथाविधान्यलिंगकानुमितिनिरूपितनियतपूर्ववर्तितायाः
स्तध्दर्मावच्छिन्नेसत्वात्॥ किंतुतत्कार्यतावच्छेदकीभूततथाविधज्ञानद्वयविशिष्टानुमितित्वाद्यवच्छिन्ननिरूपि
तनियतपूर्ववृत्तित्वमेवतादृशधर्मद्वयावच्छेदेनोत्रयवादिसिध्दंप्रकृतोपयुक्तमपितदेव॥एवंविशिष्टपरामर्शी
यकार्यतावच्छेदकीभूतविशिष्टपरामर्शीव्यवहितोत्तरानुमितिस्वरूपधर्मावच्छिन्ननिरूपितनियतपूर्ववर्तित्व

मपि विशिष्टपक्षमप्रसाद्यावच्छिन्नोभयवादिसिद्धमेवेति॥ तदवच्छेदेनान्यथासिद्धत्वकल्पनमधिकं॥ एवंच विशिष्टपरामर्शहेतुतामतेएकधर्मावच्छेदेनान्यथासिद्धत्वंकल्पनीयं॥ ज्ञानद्वयहेतुतामतेचधर्मद्वयावच्छेदेनेतिगौरवं॥ अथन्यायमतेव्याप्तिविषयतानिरूपितहेतुविषयतानिरूपितपक्षविशेष्यतात्वंलिङ्गज्ञानत्वेनपक्षविशेष्यतानिरूपितहेतुविषयतानिरूपितव्याप्तिविषयतात्वंलिङ्गज्ञानत्वेनपक्षविषयतानिरूपितासतिव्याप्तिविषयतानिरूपितयाहेतुविषयतातच्छालिङ्गज्ञानत्वेनवाहेतुत्वमित्येतादृशरीत्याविनिगमनाविरहेणकारणतानत्यमितिचेन्न॥ मीमांसकमतेपिव्याप्तिविषयकज्ञानस्यव्याप्तिविषतानिरूपितहेतुविषयतात्वंलिङ्गज्ञानत्वेनहेतुविषयतानिरूपितव्याप्तिविषयतात्वंलिङ्गज्ञानत्वेनवापक्षधर्मतात्वंज्ञानस्यहेतुविषयतानिरूपितपक्षविषयतात्वंलिङ्गज्ञानत्वेनपक्षविषयतानिरूपितहेतुविषयतात्वंलिङ्गत्वेनवाहेतुताकल्पनमित्यत्रविरहान्मीमांसकमतेकारणतावाहुल्यस्यावश्यकत्वात्॥ अथमीमांसकमतेव्याप्तिविषयताकारणतावच्छेदककोटौनिवेश्यते॥ किंतुव्यापकत्वंविषयतेव॥ एवंचपर्वतविशेष्य

कवन्स्यनुमितिंप्रतिनद्धित्वावच्छिन्नोद्देश्यकधूमव्यापकत्वप्रकारकज्ञानत्वादिनापर्वतत्वावच्छिन्नोद्देश्यकधूमत्वा
२ वच्छिन्नप्रकारकज्ञानत्वादिनाचहेतुता॥नैयायिकमतेतु धूमव्यापकवह्निसामानाधिकरण्यविषयतानिरूपितहेतुविषय
तानिरूपितपक्षविषयताश्रालिंगादिना॥एवंचोपदर्शितेविनिगताभावेनकारणतावाङ्कुर्त्यं॥तादृशविनिगमनाविर
हेणकारणतावच्छेदककोटिप्रविष्टविषयतासमसंख्याकंकारणतायाञ्चवश्यकत्वात्॥स्यानद्वयंकरणतायाछेदक
कोटिप्रविष्टविषयतापेक्षयाचञ्चधिकायाःसामानाधिकरण्यविषयतायाविशिष्टपरामर्शीकारणतावच्छेदककोटि
प्रविष्टत्वात्॥नचव्यापकत्वविषयतामात्रस्यकारणतावच्छेदककोटिप्रविष्टत्वेधूमव्यापकोवह्निर्धूमवान्पर्वतइत्ये
तादृशज्ञानद्व्यादनुमित्यापत्तिरितिवाच्यं॥इष्टत्वात्॥नचैवंनैयायिकमतेपिपर्वतीयधूमव्यापकवह्निरित्येतादृश
परामर्शस्यैवहेतुत्वंस्वीकरणीयमितिनसामानाधिकरण्यविषयताधिक्यमितिवाच्यं॥तथासतिशुद्धधूम
त्वावच्छिन्ननिरूपितव्यापकताग्रहदशायामनुमित्यनुदयापत्तिरितित्वत्सन्नवत्येवंव्यापकसामानाधिकरण्य

रूपव्याप्तिज्ञानस्यहेतुमतः॥वयंतुसाध्यवदन्यावृत्तिरूपव्याप्तिज्ञानस्यहेतुतामतमालंबामहे॥अत्रचनोपदर्शनदिग्ना
लायवंसंभवति॥यतुविशिष्टपरामर्शंहेतुतामतेव्याप्यंशोनिश्चयत्वस्यपक्षधर्मतांशोनिर्णयत्वस्यचैकत्रनिवेशात्विनिगम
नाविरहेणकारणताबाऊल्यंमीमांसकमतेतुव्याप्यंशोनिर्णयत्वस्यव्याप्तिज्ञानहेतुतायामेवनिवेशात्पक्षधर्मतांशोनिर्ण
यत्वस्यपक्षहेतुतायामेवनिवेशात्॥विनिगमनाविरहप्रसक्तिरितितदसत्॥व्याप्यंशोनिर्णयत्वस्यैवमन्मतेकारणतावे
छेदकोटौजप्रवेशात्॥व्याप्तिविशिष्टैवज्ञिष्यावगाहिज्ञानत्वेनैवानुमितिहेतुत्वोपगमात्व्याप्यंशेसंशयस्यात्थात्वेनत
तोनुमित्यापत्त्यभावात्॥विपरीतमेवगौरवंतन्मते॥व्याप्यंशेनिश्चयत्वस्यावश्यकत्वात्॥अत्रमीमांसकमतानुयायिनः॥
विशिष्टपरामर्शत्वेनहेतुतामतेव्याप्यभाववतिव्याप्यप्रकारकमित्याकारकाणांव्याप्यंशेप्रामाण्यग्रहाणांधूमाभाव
वतिधूमप्रकारकमित्याकाराणांपक्षधर्मांशेप्रामाण्यग्रहाणांचाभावाःएकत्रनिवेश्यादितिविनिगमनाविरहेणकारणता
बाऊल्यं॥ज्ञानद्वयहेतुतामतेत्वव्याप्यंशेप्रामाण्यग्रहाणामभावाव्याप्तिज्ञानहेतायांपक्षधर्मतांशेप्रामाण्यग्रहाभा

वापक्षधर्मताज्ञानहेतुतायां निवेशाद्वृत्तितदभावेकत्रा निवेशाद्वृत्तिलाघवंएतन्मतेव्याप्त्यंशीयाप्रामाण्यग्रहाभावानांपक्षधर्मताज्ञानहेतुता
४ यांपक्षधर्मतांशीयाप्रामाण्यग्रहाभावानांव्याप्तिज्ञानहेतुतांनिवेशादाय विनिगमनाविरहोनाशंवनीयः॥यतोऽप्रामाण्य
ग्रहस्यैकवरूंसामानाधिकरण्यसंबंधेनज्ञभावोनिवेशयितुंनशक्यतेप्रथमपरामर्शेऽप्रामाण्यग्रहत्वेसतद्विषयकद्वि
तीयपरामर्शादाप्यनुमित्युदयप्रसंगात्॥किंतुस्वसामानाधिकरण्यस्वविशेष्यत्वोभयसंबंधावच्छिन्नप्रतियोगिताकए
वतद्भावोनिवेशनीयः॥एवंचव्याप्त्यंशीयाप्रामाण्यग्रहस्यतादृशाभावश्चेत्पक्षधर्मताहेतुतायांनिवेशेतदाव्याप्तिज्ञानेदंज्ञाने
व्याप्यभाववत्तिव्याप्तिप्रकारकंइत्याप्रामाण्यज्ञानसत्त्वेस्वतंत्रपक्षधर्मताज्ञानादनुमित्यापत्तिः॥यपक्षधर्मीयाप्रामाण्यग्रहाभा
वश्चेव्याप्तिज्ञानहेतुतायांनिवेश्यतेतदापक्षधर्मताज्ञानेदंज्ञानेधूमाभाववत्तिधूमप्रकारकंइत्याकारकप्रामाण्यग्रहस्त्वत्वे
स्वतंत्रव्याप्तिज्ञानादनुमित्यापत्तिरितिनयेतुअप्रामाण्याग्रहाभावविशिष्टपरामर्शत्वेनहेतुतामतेविशेषणविशेष्यभावविनि
गमनाविरहात्तत्तल्लिंगकानुमितिंप्रतितत्तल्लिंगकाप्रामाण्यग्रहाभावानांपृथक्हेतुताकल्पनमेवाचितं॥एवंचविशिष्टपराम

र्हेतुताकल्प्यमनेनानाविधप्रामाण्यग्रहाभावानंएकत्रनिवेशप्रयुक्तगौरवंनभवतीतितन्न।।अप्रामाण्यग्रहाभावस्यपृथक्हे
तुत्वेप्रथमपरामर्शेःप्रामाण्यग्रहसत्वेतदनाकांक्षितद्वितीयपरामर्शादनुमित्यनुदयात्तेःअप्रामाण्यग्रहरूपप्रतिबंधसत्वात्।।
एवंज्ञानद्वयहेतुतामतेधूमोविह्निव्याप्यइत्याद्याकारव्याप्तिज्ञानस्यधूमलिंगकवह्निविशेषकानुमितित्वमवजन्यतावच्छेदकं।।नतत्रपक्षविषयतानिवेश्यतेप्रयोजनाभावात्।।एवंधूमवान्पर्वतइत्याद्याकारपक्षधर्मताज्ञानस्यधूमलिंगकपर्व
तविशेष्यकानुमितित्वमेवजन्यतावच्छेदकंतत्रनसाध्यविषयतानिवेश्यते।।एवमन्यत्रापिबोध्यंसाध्यविषयत्वंपक्षविषय
त्वयोःनिरूप्यनिरूपकभावोज्ञापकाभावनियम्यःएवंचएकैकविधव्याप्तिपक्षधर्मताज्ञानस्यैकैकसाध्यकतावच्छेदकाछिन्नविष
यतानिवेश्यएकैककारणताकल्पनमितिसहस्रसाध्यतावच्छेदकभेदेनानुमितिव्याप्तिज्ञानानामपिसहस्रंकार्य
कारणभावःएवंपक्षसत्वधर्मताज्ञानस्यापिएकैकविधस्यैकैकपक्षतावच्छेदकावच्छिन्नविषयतानिवेश्यैकैकमात्रका
रणताकल्पनमिति।।स्यपक्षधर्मतावच्छेदकभेदेनानुमितियपक्षधर्मताज्ञानानामपिकार्यकारणभावःसहस्रइति

द्वितीयसहस्रकार्यकार्यकारणभावायत्रास्माकं तत्र विशिष्टपरामर्शादीनांसहस्रगुणित्व कार्यकारणभावकल्पनं॥ तन्मतेसा
ध्यतावच्छेदकावच्छिन्नपक्षतावच्छेदकावच्छिन्नयोरकत्र निवेशानपर्वतत्वमहानसत्वादिरूपमेकंपक्षतावच्छेदकं निवेशपर्याप्ति
त्वद्रव्यत्वादिरूपसाध्यत्वावच्छेदकभेदेनकारणता महत्सस्यकल्पनीयत्वादूर्यसाध्यतावच्छेदकभेदेनकारणतावच्छेदककोटौज्ञा
नद्वयवैशिष्ट्यनिवेशस्यावश्यकतयाव्याप्तिज्ञानपक्षधर्मताज्ञानयोःपक्षतावच्छेदकसाध्यतावच्छेदकभेदेनकारणताभेदआवश्यक
कइतितन्नस्वजन्यतावच्छेदककोटौस्वमात्र॥ लघुस्तदोष॥
वैशिष्ट्यनिवेशज्ञानेवापपन्नोज्ञानद्वयवैशिष्ट्यस्यलक्षाप्यनिवेशात्॥नावव्याप्तिज्ञानादिस्वजन्यतावच्छेदककोटौपक्षधर्मताज्ञा
नादिवैशिष्ट्यानिवेशपक्षधर्मतादिज्ञानादिशून्यकालेपिव्याप्तिज्ञानादितोनुमित्यापत्तिः॥कार्यतावच्छेदकयोःव्याप्यव्यापकभाववी
रहेणफलोत्पादनेतयोःपरस्परापेक्षाभावादिवाच्यं॥कार्यतावच्छेदकसामानाधिकरण्यस्येवपरस्परापेक्षायांतंत्रत्वोपगमा

त्व्याप्यव्यापकभाव विरहेपि ज्ञातिविरहात्॥ अथ ज्ञानद्वयेनुमामते धूमोवन्हिव्याप्योज्वालोकवान्पर्वतइत्येतादृज्ज्ञानद्वयदृ॥
यांपर्वतोवह्नभाववान्नित्येतादृज्ञाबाधाभावबलात्पर्वतोवन्हिमान्नित्येतादृज्ञानुमित्यापत्तिः॥तादृज्ज्ञाव्याप्तिज्ञानस्यतादृज्ञधर्मताज्ञा
नस्यापितथाविधबाधाभावसहकारित्वादितिचेत्यादृक्त्वंयदितथाविधव्याप्तिपक्षधर्मताज्ञानैकत्रनिवेश्यबाधाभावादिघटित
सामग्याःफलव्याप्यत्वंस्वीक्रियेत्॥तदेवनकिंतलिंगकव्याप्तिज्ञानेतलिंगकपक्षधर्मताज्ञानैकत्रनिवेश्यैवनहितादृशीसामग्री
प्रकृतेतिनञपत्यवकाशाति॥केचितु धूमोवन्हिव्याप्ये धूमवान्पर्वतइत्येतादृज्ज्ञानद्वयदृज्ञायादृज्ञानंवन्हिव्याप्यत्वावछिन्नाभाव
न्हिव्याप्यात्वावछिन्नप्रकारकंइत्यप्रामाण्य मपिमीमांसकमतेऽनुमित्यदृयेनतादृज्ञाप्रामाण्यग्रहे
भवन्हिव्यात्वावछिन्नाभाववद्भूतिविष्यतानिरूपितत्वावगाहित्वात्॥शुद्धधूमत्वावछिन्नप्रका
रताज्ञालिंज्ञाना बीजाभावात्एवंचनादृज्ञाप्रामाण्यग्रहाभावमनिवेश्यज्ञानद्वयहेतुतास्वीकरणीया॥तथा
वन्हिव्याप्यत्वावछिंनधूमवान्पर्वताइत्याकारकव्याप्यत्वावछिन्नप्रकारताज्ञालिंज्ञानादपितादृज्ञाप्रामाण्यग्रहदृज्ञायांआ

नुमित्यापत्तिः॥ धूमवान्पर्वतइतियादृज्ञानेहेतुतायांशुद्धधूमत्वावच्छिन्नप्रकारत्वंनिवेशयतत्रापतिव्याप्तेरत्वप्रामाण्यग्रहशून्यकालेपि
विशिष्टपरामर्शादनुमित्यस्वीकारप्रसंगः॥तदनुरोधेनतादृशप्रामाण्यग्रहाभावंनिवेश्यविशिष्टपरामर्शेहेतुत्वस्वीकारेचरूप
मधिकेनज्ञानद्वयहेतुत्वेन॥एवंज्ञानद्वयहेतुतामतेधूमोवह्निव्याप्यइत्येतादृशव्याप्तिज्ञानदशायांवह्निव्याप्यत्वावच्छिन्नाभाववान्
धूमवांश्चपर्वतइत्येतादृशपक्षधर्मतायास्त्वेयनुमितिरित्यतेतादृशपक्षधर्मताज्ञानस्यापिधूमत्वावच्छिन्नाभावानवगाहित्वात्॥
एवंवह्निव्याप्यत्वावच्छिन्नाभावप्रकारकान्यत्वरूपनिर्णयत्वस्यपक्षधर्मताज्ञानहेतुतायांनिवेशयितुंनशक्यइतिवह्निव्याप्यत्वा
वच्छिन्नाभाववान्वह्निव्याप्यधूमवान्पर्वतइत्यादि वाक्यवेतिसंशयदशायामनुमित्यापत्तिरितिन्यायमतंएवंसाधितंइत्याहुः॥त
थाहि॥वह्निव्याप्यत्वावच्छिन्नाभाववतिवह्निव्याप्यत्वावच्छिन्नप्रकारकंइत्याकारकाकाणांवसाधितइत्याहुः॥तदन्यसत्॥अप्रा
प्यग्रहाणामभावानपेक्षधर्मता ज्ञानेविशेषणतयानिवेश्यतेनधूमवान्पर्वतइत्येतादृशपक्षधर्मताज्ञानदशायांवह्निव्याप्यत्वावच्छेदक
कीभूतवह्निव्याप्यत्वावच्छिन्नप्रकारतासंबंधावच्छिन्नप्रतियोगिताकस्तादृशप्रामाण्यग्रहाभावोहेतुप्रकारतायामवनिरूपि

ज्ञानतादृशा

तत्वप्रकारतात्रिप्रामाण्यग्रहदशाया मनुमितिर्नोत्पद्यते॥ अपितुस्वीयवन्निष्ठाभावप्रतियोगिताकस्य ज्ञानातादृग्
वेद्यतेधूमवान्पर्वतइत्येतादृज्ज्ञानीयप्रकारतायांवन्निष्ठाभावप्रतियोगितावच्छेदकसंबंधावच्छिन्नप्रतियोगितासत्वेनोक्तसंबंधावच्छिन्नप्रतियो
गिताकस्तथाविधाप्रामाण्यग्रहाभावस्तदानीमपिसुलभइतिनानुपपत्तिः॥ अथेवंपुरुषांतरीयतादृशप्रामाण्यग्रहदशापामपिवन्निष्ठाभा
व्यधूमभान्पर्वतइतिपरामर्शादनुदयापत्तिःतादृज्ज्ञानीयहेतुप्रकारतायामुक्तबंधेनपुरुषांतरीयाप्रामाण्यग्रहस्येवसत्वाद्यतिवै
ल्ल॥तादृप्रकारत्वस्वसमानाधिकरणज्ञाननिरूपितत्वोभयसंबंधावच्छिन्नप्रतियोगिताकाभावस्यैवनिवेश्यत्वात्॥ नीयतयास्वव्यधि
करणज्ञानीप्रकारतायास्वसमानाधिकरणज्ञानी॥ निरूपितत्वघटितोभयसंबंधेनाप्रामाण्यग्रहसत्वेनानुपपत्त्यभावात्॥
स्वसमानाधिकरणज्ञानेस्वविशेष्यत्वमपिनिवेश्यमतोज्ञानांतरविशेष्यकाप्रामाण्यग्रहदशायांतदनास्कंदितपरामर्शा
नानुमित्यनुपपत्तिः॥ एवंवन्निष्ठाभावप्रतियोगितावच्छेदकीभूतवन्निष्ठाभावप्रतियोगितावच्छेदकत्वस्वनिरूपितत्वोभयसंबंधेनपर्वतत्वावच्छिन्नवि
तियोगितासंसर्गावच्छिन्नप्रकारतावच्छेदकीभूतवन्निष्ठाभावप्रतियोगितावच्छेदकत्वस्वनिरूपितत्वोभयसंबंधेनपर्वतत्वावच्छिन्नवि

शेष्यतानिरूपिताभावप्रकारतावदन्यत्वमेवहेतुप्रकारतायांनिवेश्यतेनतुवह्निव्याप्यत्वावच्छिन्नाहेतुमताज्ञानंप्रतीतानवह्निव्याप्यत्वावच्छिन्नाभावावान् धूमवांश्चपर्वतइत्येतादृशज्ञानादनुदयापत्तिः॥अथैवंसाध्यतावच्छेदकभावप्रकारताकान्यत्वंधि
७ तनिर्णय। त्वादेःपक्षधर्मताज्ञानहेतुतायांनिवेशेतस्यसाध्यतावच्छेदकभेदेनहेतुत्वभावश्यकमितिनपूर्वोक्तलाघवावकाइतिचेत्एवम
विशेष्यव्याप्तिज्ञानस्यपक्षतावच्छेदकभेदेनहेतुताभेदौंतथाहि॥विशिष्टपरामर्शोहेतुतामतेपक्षधर्मतावच्छेदकभेदानंतहेतुमनोज्ञान
कारणतायांव्याप्तिविषयतानिवेशादनंतस्थलेऽवश्यंभेदकगौरवंभावालाघवमेवापक्षविषयतायांतु ५ ५५विषयतायांव्या
प्तिघटकीभूतपदार्थविषयतायांवाधितत्वविषयत्वेनिरूपितत्वेनावच्छेदकत्वमुपेयतइत्यत्रविनिगमनाविरहेणानंतस्थलेका
रणताधिक्यमस्माकंव्याप्तिज्ञानस्यस्वतंत्रत्वेहेतुताककल्पनमित्यत्रचविनिगमनाविरहेणकतिपयकारणताधिक्यमपि अ
तिस्फुटमेवलाघवं॥यतुज्ञानद्वयहेतुतामतेसिद्ध्येनुमित्साविशिष्टपरामर्शस्योत्तेजकताकल्प्यव्याप्तिज्ञानपक्षधर्मताज्ञा
नयोरेकविशिष्टपरमेवोत्तेजकंवाच्यंतत्रचविशेषणविशेष्यभावेविगमनाविरहेणप्रतिबध्यप्रतिबंधभावबुद्धिरिति

तदसत्॥ज्ञानद्वयहेतुतावादिभिः प्र भाकरैः सिधिप्रतिबंधकतायाएवानंगीकारात्॥अत्रवदंतिज्ञानद्वयहेतुतावादिमतेहेतुता
वच्छेदकभेदेनकारणताबाकुत्र्यं॥धूमोवन्हिव्याप्यालोकवान्पर्वतइत्येतादृशज्ञानद्वयादितानुमितिवारणायतन्मतेशिष्य
हेतुतावच्छेदक विषयतानिवेशस्यावश्यकत्वात्॥नैयायिकमतेचहेतुतावच्छेदकमनिवेश्यसाध्यव्यापकत्वावच्छिन्नप्रका
रताकत्वेनैवधूमोलोकादिलिंगकपरामर्शानांहेतुताकल्पतेइतितद्भेदेननकारणताबाकुत्र्यं॥अथधूमोविद्भिर्व्याप्यो
धूमवान्पर्वतइत्यादिनिर्णयानांवह्न्यनुमितोयदास्वतंत्रंकारणताकल्पतेतदेवंवकुंशाकल्पतेतदेवन॥अन्यंत्रकूप्तकारण
तयैवनिर्वाहात्॥तथाहि॥धूमोवन्हिव्याप्यइत्येतादृशनिर्णयस्यापाद्यव्यतिरेकनिर्णयमुद्र्याधूमोवन्हिव्याप्यः नस्या
दित्येतादृशापन्नोविशेषणतावच्छेदकप्रकारनिर्णयादिमुद्र्यावन्हिव्याप्यधूमविशिष्टधूमव्याप्तिवैशिष्ट्यबोधारहेतुता
सर्ववादिसिध्येवतंत्रेवापत्तित्वादिकमनिवेश्याव्यवहितोत्तरत्वसंसर्गेणतादृशनिर्णयवत्त्वमात्रस्यैवजन्यतावच्छेदक
त्वमुपेयतेऽनुमितिरपितादृशजन्यतावच्छेदकाक्रांततयातत्स्थलीयहेतुतयैवापवैशिष्ट्यकारणंत्वयानिर्वाढुः यि

रूक्तविशेषः धूमोन्हिव्याप्यो धूमएवापत्तिः॥ एवं धूमवान्पर्वतइत्येतादृग्ज्ञानस्यापिपर्वतोनिधूमःस्यादित्येतादृग्ज्ञान्पर्व
८ तदृत्यादिनिर्णयादिप्रत्येकत्रयंवापत्त्यादिकार्यमुत्पादयति॥ अनुमितिंप्रतिपुनःसंभूयैवसामग्रीव्याप्तिवैचित्र्यादिति
चेत्एवंचेसतिविशिष्टपरामर्शस्यापिकूप्तकारणतयैवोपदर्शितदिशानिर्वहयितुंशक्यतयालाघवगौरवाभावाद्ज्ञान
ह्यादनुमितिस्वीकारोनियुक्तः॥ वस्तुतस्तुपरामर्शस्यकूप्तकारणतयानिर्वाहेप्यनुमितिसामग्रीप्रतिबंधकतायाःलिंग
भेदेनबाढुल्यंमीमांसकमतेदुर्वारमेव॥ धूमोवन्हिव्याप्यः अलोकवान्पर्वतइत्येतदृग्ज्ञानह्यादिकालेभिन्नविषयकप्रत्य
क्षोयपस्तयेधूमत्वावछिन्नविशेष्यकव्याप्तिज्ञानधूमत्वावछिन्नप्रकारकपक्षधर्मताज्ञानाभ्यामेवव्याप्तिज्ञानहेतुमत्ता
ता ज्ञानयोःसाग्रीप्रतिबंधकोयोनिवेशनीयत्वात्॥ नयायिकमतेधूमालोकादिपरामर्शाणामुक्तानुगतरूपेणवनिवेश
नसंभवान्नलिंगभेदेनसामग्रीप्रतिबंधकाभेदइति॥ अथस्वीयव्याप्तिप्रकारतानिरूपितविशेष्यतावच्छेदकधर्मावछिन्न
स्वसामानाधिकरण्योभयसंबंधेनव्याप्तिज्ञानविशिष्टपक्षप्रकारतानिरूपितविशेष्यताकस्वधर्मताज्ञानत्वेनधूमवान्य

र्वतइत्यादिज्ञानानांसामग्रीप्रतिबंधकतायांनिवेशनीयतयाधूमोवह्व्याप्यालोकवान्पर्वतइत्यादिज्ञानकालेनप्रत्य
क्षानुपपत्तिरितिमीमांसकमतेपिनलिंगभेदेनानुमितिसामग्रीप्रतिबंधकताभेदइतिचेदेवमप्युपदर्शितरूपेणहेतु
मताज्ञानांस्वीयपक्षविशेष्यतानिरूपितप्रकारताचछेदकावछिन्नविशेष्यतानिरूपितव्याप्तिप्रकारताकज्ञानत्व
कत्वसामानाधिकरण्येनोभयसंबंधेनपक्षधर्मताज्ञानविशिष्टव्याप्तिज्ञानत्वेनव्याप्तिज्ञानांवासामग्रीप्रतिबंधकता
यांनिवेशेनानिगमनाविरहेणसामग्रीप्रतिबंधकतावाहुल्यदुर्वारमेवाएवंवह्व्याप्याभाववान्पर्वतइत्याद्या का
रकप्रत्यक्षादेपर्वतादिविशेष्यकवह्न्यनुमितिसामग्याप्रतिबंधकताधिक्यंमीमांसकमते॥अन्यथाधूमोवह्नि
व्याप्योधूमवान्पर्वतइत्येतादृशज्ञानद्वयघटितानुमितिसामग्यादृशांतथाविधप्रत्यक्षाद्यापत्तेः॥नैयायिकम
तेत्वनुमितिसामग्रीविशिष्टपरामर्शस्यावश्यकतयातस्यचतादृशप्रत्यक्षादौबाधमुद्दश्याप्रतिबंधकतयातत्रैव
तदानींतथाविधप्रत्यक्षाद्यनुत्पादसंभवात्सामग्रीप्रतिबंधकताकल्पनंविनैवोपपत्तिघटादिप्रत्यक्षस्थलीयानुमिति
सामग्रीप्रतिबंधकतायांघटप्रत्यक्षंमैजायतामित्याकारकेच्छायाउत्तेजकत्वानुरोधेनप्रतिबंधकताभेदस्याव

रयकत्वात्अथाप्रत्यक्षानुमित्यादीनांयुगपदुत्पादोपगमेनदूरेव्यक्तिकल्पनाबाहुल्यंतद्व्यक्तिद्वोर्वापर्यादिवह्नकका
र्यकार्यैरणभावानंयंचाभेदेतुप्रत्यक्षत्वानुमितित्वादिसांकथमित्येवंसामग्रीप्रतिबंधकनाशंबीजंगुणानांजाति
मनंगीकुर्वतांप्रत्यक्षत्वानुमितित्वादीनांजातित्वाभावात्सांकर्यस्यादोषाच्यानुमित्यादुत्पत्तिकालेतदभिनप्रत्यक्षा
दुत्पादोपगमेऽपितिविरहात्सामग्रीप्रतिबंधकताकल्पनंकापिनास्तिकोपिदर्शीतत्रित्यत्पादावनुमितिसामग्रीप्र
तिबंधकताकल्पनगौरवमितिचेन्नाव श्यानुमितावुदासीनपदार्थविषयतायाअनुभवविरुधतयासामग्री
प्रतिबंधकतायाश्चसर्वमतएवावश्यकादितिन्यायमतएवसम्यक्॥इदमत्रावधेयंअस्तुपदर्शितगौरवंमीना
सकमतेतथापिनिन्नविषयकप्रत्यक्षादिकंप्रतिधूमवत्सर्वतत्वावच्छिन्नपक्षकवह्निव्याप्यधूमसमानाधिकरणाभा
वकत्वाघवच्छिन्नविधेयकानुमितिसामग्रीणामनंतानांप्रतिबंधकत्वाकल्पनेलाघवंतादृशानुमितिसामग्रीकाले
धूममत्वावच्छिन्नविशेष्यव्याप्तिज्ञानधूमत्वावच्छिन्नप्रकारकपर्वतज्ञानादिघटितधूमलिंगकपर्वतपक्षकव
ह्निविधेकानुमित्यादिसामग्र्याअवश्यकत्वात्प्रतिबंधकतैयेवोपपत्तेः॥नेयायिकमयेतुतादृशासामग्रीकालेप

र्वतादिपक्षकवह्न्याद्यनुमितिजनकविशिष्टपरामर्शोत्तेजनत्वात्तेजनुमितिसामग्रीणांप्रतिबंधकत्वांतरकल्पनमावश्यकमेवेतिअ
प्यपर्वतादिपक्षकवह्नानुमितिसामग्रीप्रतिबंधकतायांपर्वतोवह्निमानित्याकारकसिद्धिभावस्यावश्यंनिवेशनीयतयातथाविधसिद्धि
कालेउपदर्शितसामग्रीसत्वेभिन्नविषयकप्रत्यक्षापत्तिरितितथा विधसामग्रीणांप्रतिबंधकत्वांतरकल्पनप्राभाकराणामप्यावश्यं
कमितिचेत्स्यादेवं॥यदिप्राभाकरैरेसिद्धिप्रतिबंधकतास्वीक्रियते॥अथैवमपिपर्वतोवह्न्याभाववान्विशाकारकपर्वतपक्षकवह्न्याद्यनुमि
तिप्रतिबंधकबाधादिकालेतादृशानुमित्सामग्रीसत्वेभिन्नविषयकप्रत्यक्षाद्यापत्यातथाविधानुमितिसामग्रीणांप्रतिबंधक
त्वांतरकल्पनंप्राभाकराणामप्यावश्यकमितिचेदेवमपितथाविधबाधादिबुद्धिप्रतिबंधीभूतवह्निमत्सर्वतद्वृत्तिवह्निव्याप्य
धूमसमानाधिकरणालोकत्वावच्छिन्नसाध्यकधूमावत्सर्वतत्वाद्यवच्छिपक्षकानुमितिसामग्रीप्रतिबंधकत्वकल्पनयुक्तलाघवंधुव्यहरमेवतथ्यविधसामग्रीकालेपर्वतोवह्निभाववानित्याद्याकारकबाधबुध्यभावघटितायाःपर्वतपक्षवह्नुमिति
सामग्र्याआवश्यकत्वादिति॥अथपर्वतोवह्निमानित्याद्याकारकप्रत्यक्षाद्यबोधादीनांतथाविधानुमितिसामग्र्यप्रति

बध्यतयोपदर्शितविशिष्टधर्मावच्छिन्नस्याध्यक्षानुमितिसामग्रीघटितद्वयोधिकल्पनमावश्यकं॥एवंचतत्रैवविषयतिवेश्व
१० मिन्नैवविशिष्याकानुमितिञ्जज्ञानत्वस्यैवप्रतिबध्यतावच्छेदकत्वमुपेयतइतितत्रएवान्यविषयतप्रत्यक्षादिवारणसभवान्न
तादृशसामग्र्याप्रतिबंधकत्वाधिक्यं॥वह्निप्रत्यक्षंजायतामित्याकारकेच्छानाविरोध्यतेजकत्वानुरोधाद्विषयभेदेनप्रतिबंध्य
प्रतिबंधकाभावस्यावश्यइतितुनाशंकनीयं॥यतःस्वविषयत्वस्ववृत्तिकृतिमत्वोभयसंबंधेनसामान्यमइच्छाविशिष्टान्यत्व
स्यकार्यतावच्छेदककुक्षिनिवेशेनैवेच्छाधिनेज्ञाव्यभिचारस्यवाक्यवारणतयाइच्छाउत्तेजकतेवनास्तियद्यप्येवंनयायत्रैक
प्रतिपक्षिमीमांसकमतेपिवह्निप्यो व्यो भाववान्पर्वतइत्येतादृशप्रत्यक्षोदीयपर्वतादिपक्षकवाह्न्याद्यनुमितिसामग्री
प्रतिबंधकत्वकल्पनप्रयुक्तमुपदर्शितगौरवंनसंभवति॥घटप्रत्यक्षस्थलीयप्रतिबंधकाभावेनैवोपपत्तोमीमांसकमते
पिस्वातंत्र्यप्रतिबद्धतिबद्धकताकल्पनाविरहातथाविधोपदर्शितलाघवंनिराबाधमेवेति॥यत्तूपदर्शितोभयसंबंधने
छाविशिष्टंन्यत्वस्यप्रतिबध्यतावच्छेदकत्वेइच्छाकोलेविशेषिसाम्यभावेचनतत्वछिन्नापतिस्तत्रैवसामान्यतइच्छात्वा

दिनाप्रतिबंधकत्वकल्पमानंनसंभवतिघटप्रत्यक्षंआयतामित्येतादृशेच्छाकालेप्रत्यक्षादिसामग्र्यांसत्यांतादृशेाभयसंबंधे
नेच्छाविशिष्टान्यत्वस्यघटप्रत्यक्षादेरनुत्पादप्रसंगात्।।तस्मादिच्छायाउत्तेजकत्वमावश्यकमितितदसत्।।उपदर्शितोभयसं
बंधेनेच्छाविशिष्टान्यघटचाक्षुषत्वावच्छिंनंप्रतिघटचाक्षुषंजायतामितिमित्येतादृशेच्छानाविशिष्यप्रतिबंधकताकल्पनेवोप
दर्शितापत्तिवारणंसंभवात्सामग्रीप्रतिबंधकतायांविशिष्टइच्छायाउत्तेजकत्वापेक्षयाप्रतिबध्यप्रतिबंधकभावस्यैवकल्पयितु
मुचितत्वादितिचेत्।।अस्तेतादृशरात्योपदर्शितानुमितिसामग्रीप्रतिबंधकताधिक्यपरिहारस्वप्यावितादृशसामग्र्याःप्रतिबध्य
तावच्छेदकगौरवंदुर्वारमेव।।तथाहि।।मन्मतेतादृशसामग्र्याःपर्वतविशेष्यकवह्निप्रकारकानुमित्यन्यज्ञानत्वादिकमेवप्रतिबध्य
तावच्छेदकंघटप्रत्यक्षादेस्तत्प्रतिबध्यतावच्छेदकानाक्रांतत्वेपिक्षतिविरहात्।।भवन्मतेतुघटप्रत्यक्षादिसाधारणवह्निमत्प
र्वतवृत्तित्वद्रव्याप्यधूमत्वावच्छिन्नप्रकारतानिरूपितधूमवान्पर्वतत्वावच्छिन्नमुख्यविशेष्यतात्वत्यनुमित्यंन्यज्ञानत्वोदवतप्या
त्वमुपेयं।।केवलस्यानुमित्यन्यत्वस्यतथात्वेसमानविषयकशाब्दबोधादोव्यभिचारप्रसंगादिति।।एवंचात्मवरहाद्यनुमि

९९ तिसामग्रीप्रतिबंधकतायामेकजानाविशिष्टापरज्ञानप्रयुक्तमुपदर्शितगौरवंमीमासकमतेतत्स्थानीयतादृग्गानुमि
तिसामग्रीनीएतोपदर्शितानंतानंतसामग्रीणांप्रतिबध्यकावच्छेदकगौरवमितिमीमासकमतमेवसमीचीनतयाप्रतिभा
ति॥ ॥इतिज्ञानद्वयहेतुताविचारः॥ ॥श्रीमदच्युतचरणारविंदार्पणमस्तु॥श्रीलक्ष्मीनृसिंहा
र्पणमस्तु॥श्रीगजाननार्पणमस्तु॥यादृशंपुस्तकंदृष्ट्वातादृशंलिखितंमया॥यदिशुद्धमशुद्धंवामममदोषोनविद्यते॥ छ॥॥
॥श्रीशुभमस्तु॥श्री॥श्रीकृष्ण ॥ श्रीगजानन ॥ श्रीसांब ॥ श्रीराम ॥श्रीसद्गुरु ॥ नृसिंहश्री ॥